# shrIdInabandhvaShTakam

# શ્રીદીનબન્ધ્વષ્ટકમ્

## Document Information

Text title : dInabandhvaShTakam

File name : dInabandhvaShTakam.itx

Category : aShTaka, vishhnu, vishnu_misc, brahmAnanda, vishnu

Location : doc_vishhnu

Author : Swami Barhmananda

Proofread by : PSA Easwaran

Latest update : June 13, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 3, 2025

*sanskritdocuments.org*

shrIdInabandhvaShTakam

# શ્રીદીનબન્ધ્વષ્ટકમ્

યસ્માદિદં જગદુદેતિ ચતુર્મુખાદ્યં યસ્મિન્નવસ્થિતમશેષમશેષમૂલે ।
યત્રોપયાતિ વિલયં ચ સમસ્તમન્તે દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૧॥

ચક્રં સહસ્રકરચારુ કરારવિન્દે ગુર્વી ગદા દરવરશ્ચ વિભાતિ યસ્ય ।
પક્ષીન્દ્રપૃષ્ઠપરિરોપિતપાદપદ્મો દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૨॥

યેનોદ્ધૃતા વસુમતી સલિલે નિમગ્ના નગ્ના ચ પાણ્ડવવધૂઃ સ્થગિતા દુકૂલૈઃ ।
સમ્મોચિતો જલચરસ્ય મુખાદ્ગજેન્દ્રો દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૩॥

યસ્યાર્દ્રદૃષ્ટિવશતસ્તુ સુરાઃ સમૃદ્ધિમ્ કોપેક્ષણેન દનુજા વિલયં વ્રજન્તિ ।
ભીતાશ્ચરન્તિ ચ યતોઽર્કયમાનિલાદ્યાઃ દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૪॥

ગાયન્તિ સામકુશલા યમજં મખેષુ ધ્યાયન્તિ ધીરમતયો યતયો વિવિક્તે ।
પશ્યન્તિ યોગિપુરુષાઃ પુરુષં શરીરે દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૫॥

આકારરૂપગુણયોગવિવર્જિતોઽપિ ભક્તાનુકમ્પનનિમિત્તગૃહીતમૂર્તિઃ ।
યઃ સર્વગોઽપિ કૃતશેષશરીરશય્યો દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૬॥

યસ્યાઙ્ઘ્રિપઙ્કજમનિદ્રમુનીન્દ્રવૃન્દૈ- રારાધ્યતે ભવદવાનલદાહશાન્ત્યૈ ।
સર્વાપરાધમવિચિન્ત્ય મમાખિલાત્મા દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૭॥

યન્નામકીર્તનપરઃ શ્વપચોઽપિ નૂનં હિત્વાખિલં કલિમલં ભુવનં પુનાતિ ।
દગ્ધ્વા મમાઘમખિલં કરુણેક્ષણેન દૃગ્ગોચરો ભવતુ મેઽદ્ય સ દીનબન્ધુઃ ॥ ૮॥

દીનબન્ધ્વષ્ટકં પુણ્યં બ્રહ્માનન્દેન ભાષિતમ્ ।
યઃ પઠેત્ પ્રયતો નિત્યં તસ્ય વિષ્ણુઃ પ્રસીદતિ ॥ ૯॥

ઇતિ શ્રીપરમહંસસ્વામિબ્રહ્માનન્દવિરચિતં શ્રીદીનબન્ધ્વષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA EASWARAN

*shrIdInabandhvaShTakam*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*